International Journal of Sanskrit Research 2016; 2(1): 66-68

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 66-68
© 2016 IJSR
www.anantaajournal.com
Received: 26-11-2015
Accepted: 28-12-2015

डा0 गौतम शरण त्रिपाठी
खजुहान, टरवॉ पारसा, रसूलपुर, एकमा, सरण, बिहार, भारत

Corresponding Author:
डा0 गौतम शरण त्रिपाठी
खजुहान, टरवॉ पारसा, रसूलपुर, एकमा, सरण, बिहार, भारत

# बालरोग–विमर्शः

**डा0 गौतम शरण त्रिपाठी**

**प्रस्तावना**

भारतीयसंस्कृतवाड्मये वेदः अग्रगण्यः यतः जीवनसंरक्षणार्थं सर्वाणि विषयाणि सन्निहितानि सत्यामामनान्ति विद्वांशः। एतादृशस्य वेदस्य सर्वोत्कृष्टांगरूपेण नेत्रस्थाणीयमस्मांक ज्योतिषशास्त्रं कालविधानशास्त्रत्वात् ''कालः पचति भूतानि'' इत्यनेन प्रतिष्ठितं विद्यते। सिद्धान्तसंहिताहोरेति स्कन्धत्रयात्मकस्य होरास्कन्धः जातकशास्त्रस्य बालरोगविमर्शः (अरिष्टाध्यायः) सर्वेषु होरासम्बन्धिग्रन्थेषु नितरां शोभते। अत्र नवजातशिशुनाम् आरिष्टविचारं विद्यते। आरिष्टं नाम नेष्टं कारणरूपेण रोगमिति शास्त्रान्तरे वर्णित विद्यते।

''अक्षतं चारिष्टमस्तु'' इत्यनेन पूर्वजं प्रति प्रार्थनामन्त्रं परिदृश्यते।

''आरिष्टं सूतिकागृहम्'' इति कोषवचनात् सूतिकागृहसंरक्षणार्थं नवजातशिशुनां च प्रयुक्तं विद्यते। अतएवं बालारिष्टरोगविचारविषये जातकपारिजातककारस्य दैवज्ञ बैद्यनाथमहाभागस्य वचनम्–आद्वादशब्दान्तरयोनिजन्मनामायुः कालनिश्चयितुं न शक्यते। मात्रा च पित्रा कृतपापकर्मणा। तथद्या–

बालग्रहैर्नाशमुपैति बालकः।। [1]

योनिजन्मनां प्राणिनां जन्मतः द्वादशवर्षपर्यन्तं आयुः निश्चयमति कठिनं विद्यते। यतः अस्मिन काले मात्रा च पित्रा कृतपापकर्मणा फलस्वरूपं बालग्रहैर्बालकः नाशमुपैति। अपि च कथयति वैद्यनाथदेवज्ञः–

आद्येचतुष्के जननी कृताघैर्मध्ये पित्राऽर्जितपापसंघैः।
बालस्तदन्यासु यतुः समासु स्वकीयदौषैः समुपैतिनाशम्।। [2]

जातकस्वकीयजीवनस्य प्रथमे चतुष्के वर्षे मात्रा कृतपूर्वसंचितपापफलस्वरूपम्, अग्रिमेषु चतुर्वर्षेषु पित्रा कृतपापकर्मणा एवं अन्तिमेषु चतुर्वर्षेषु स्वकीयदोषैरथात् पूर्वसंचिता पापकर्मणा नाथसमुपैति। पूर्वोक्तश्लोकद्वयं फलदीपिकाया त्रयोदशमे अध्यायेऽपि उपलब्धं विद्यते। सर्वार्थचिन्तामणिपुस्तकानुसारेणऽपि जन्मतः द्वादशवर्षपर्यन्तं आयुर्विचारमतिः कठिनं विद्यते। कथितमपि–

आद्वादशब्दाज्जन्तूनामायुर्ज्ञानुम न शक्यते।
जपहोमकित्साद्येर्बालरक्षां तु कारयेत्।।
पित्रोर्दोषैर्मृताः केचित्यकेचिद्बालग्रहैरपि।
अपरेअरिष्ट योगाच्च त्रिविधा बालमृत्यवः।। [3]

द्वादशवर्षपर्यन्त जातकानानायुर्ज्ञा नामकरणीयमित्यादेशयति सर्वार्थचिन्तामणिकारः। आरिष्टं प्राप्ते सति जपहोमचिकित्साद्यैर्बालरक्षां करणीयमित्यऽपि कथितम्। विषयेऽस्मिन महर्षिः पराशरस्य मतभिन्नं विद्यते। चतुर्विंशतिवर्षपर्यन्तं पराशरेण बालारिष्टरोगविचारः कथितम्। यथा–

चतुर्विंशतिवर्षाणि यावत् गच्छन्ति जन्मतः।
जन्मारिष्टं तु तावत्स्यादायुर्दायः न चिन्तयेत्।। [4]

बालारिष्टरोगविचारे आयुसम्बन्धयञ्चल्प–मध्य–दीर्घादि भेदमऽपि विचिन्त्यनीयमिति। यथा वचनम् अष्टौबालपरिष्टमादौ नराणां योगरिष्टं प्रादुराविंशतिः स्यात्।

अल्पं चाद्वात्रिंशतान्मध्यमायु रासप्ततायाः पूर्ण मायुः शतान्तम्।। [5]

जन्मतोऽष्टवर्ष पर्यन्तं बालारिष्टं विंशतिवर्षपर्यन्तं योगारिष्टं च भवति। द्वात्रिंशतवर्षपर्यन्तमल्पायु द्वात्रिंशतवर्षतः सप्ततिवर्षपर्यन्तं मध्यमायुः एव सप्ततिः शतवर्षपर्यन्तं पूर्णायुर्भवति। शतवर्षाधिकपरमायुः कथ्यते।

सर्वार्थचिन्तामणिकारस्य वचनमेतादृशम्द्वत्रिविंशत्पूर्वनल्पं स्यात्तदूर्ध्वं मध्यमं भवेत्।
आसप्ततेस्तदूर्ध्वं तु दीर्घायुरिति सम्मतम्। उत्तमायुः शतदूर्ध्वमिहं शंसन्ति तद्विदः।। [6]

आयुः विचारम् सर्वार्थचिन्तामणिकारः द्वात्रिंशतवर्षपर्यन्तमल्पायुः स्यात्तदूर्ध्वं मध्यमायुः आसप्ततेस्तदूर्ध्व दीर्घायुः भवेत्। यदि राशिरन्तिमंशानां लग्ने जन्म भवेत्, सा राशिः यदि पापान्विता पापदृष्टः वा भवेत्तदा जातकः जन्म कालपश्चात् साद्यो विनाशमुपैति। गण्डान्ते जन्मनि मातुः पितुश्च स्वयं जातकस्य घातकः भवति। जीविते सति तृपति नृपतितुल्यो वा भवति। सन्धिचतुष्ट्ये जन्मनि, अशुभसंयुतेक्षिते जातकस्य मृतिः स्यात्।
राशिमृत्युर्भागे यदि जन्मकालिकः चन्द्रः स्थितः भवेत्। केन्द्रेऽष्टमे भावे वा स्थितः भवेत्तदा जातकः जन्मकालपश्चात् साद्यो विनाशमुपैति। गण्डान्ते जन्मनि मातुः पितुश्च स्वयं जातकस्य घातकः भवति। जीविते समि नृपति नृपतितुल्यो वा भवति। सन्धिचतुष्टये जन्मनि अशुभसंयुतेक्षिते जातकस्य मृतिः स्यात्। राशिमृत्युर्भागे यदि जन्मकालिकः चन्द्रः स्थितः भवेत्। केन्द्रेऽष्टमे भावे वा स्थितः भवेत्तदा जातकः जीवितं न तिष्ठति।
अपि च बालारिष्टं योगं कथयति दैवज्ञ वैद्यनाथमहानुभावेन् यथा क्षीणेशशिनि उदयगे यदि कण्टकस्थे पापोऽथवा निधनगे म्रियते तु बालः। रन्ध्रारिधैरशुभखेटदृशा समेतैः सौम्यैः कृतान्तनगरं समुपैति मासात्। क्षीणचन्द्रः लग्ने पापग्रहश्च केन्द्रे अष्टमे वा यदि स्थितः भवेत्तदा जातकस्य मृत्युर्भवति। अष्टमस्थः षष्टमभावस्थः वा शुभग्रहः यदिपापनिरीक्षितः तदा जातकः एकस्मिन् मासे मृत्युलोकमुपैति। संदर्भितविषये कल्याणवर्मा महानुभावस्य वचनम्–

क्षीणेशशिनि विलग्ने कण्टकनिधना श्रितैस्तथा पापौः।
सौम्यादृष्टे मृत्युः साद्यः सत्यस्य निर्देशः।।
सौम्याः षष्ठाष्टमगाः पापैर्वक्रोपसंगतैर्दृष्टाः।
मासेन मृत्युदास्ते यदि न शुभैस्तत्र सन्दृष्टाः।। [7]
विषयेऽस्मिन् बाराहस्योक्तिर्यथा–
शशिवत्सौम्याः पापैर्वक्रिमिवलोकिता न शुभदृष्टा।
मासेन मरदाः स्युः पापजितो लग्नपश्चास्ते।। [8]

बक्रतेर्पापग्रहैः दृष्टाः शुभग्रहाः चन्द्र वदर्थात् लग्नात् षष्ठे वा अष्टमे स्थिता शुभग्रहाः विलोकिता न तदा एकमासेन निधनप्रदाः भवेयुः अथवा पापैर्विवर्जितः लग्नेशः अस्ते लग्नात्समस्थे तदा मासेन निधनं भवतीति।
बालारिष्टरोगविचारविषये दैवज्ञ जीवनाथस्य वचनम् यथा–

तुहिनकिरणहोरिका च सन्ध्यानचरमगाः खलगेचरा जनो चेत्।
मृतिरथ रजनीशपापखेटैरखिल– चतुष्टयगैर्विनाशमेति।। [9]

सन्ध्याकाले जन्मभवेत् जन्मलग्ने चन्द्रमसः होराभवेत् पापग्रहा स्वीकयान्तिमे नवमे नवमांशे यदि स्थिता भवेयुस्तदा जातकस्य मृत्युर्भवति। पापग्रहयुतः चन्द्रः यदि केन्द्रे स्थितः भवेत् एव मन्ये पापग्रहारपि केन्द्रे एव स्थिताः भवेयुस्तथाऽपि जातकस्य शीघ्रमेव मृत्युर्भवति।

अहोरात्रे सन्ध्याद्वयं भवति। सूरयोदयकाले पूर्वसन्ध्या सूर्यास्तसमये च परसन्ध्येति। सूर्योदयात्1/30 घट्यादि पूर्वतः प्रारम्भये सूर्योदयं पश्चात् 1/30 घट्यादि अर्थात घटीत्रयं भवति। पूर्वसंध्याया 1/30 घट्यादि सूर्यास्त पूर्वतः प्रारमभ्य 1/30 घट्यादि सूर्यास्त पश्चात् घटीत्रयं मानं भवति परसंध्याया।
धनयोर्द्वयोर्सध्ययोर्यदि जातकस्य जन्म भवेतदा उक्तयोग्यं विचारं करणीयमिति।
बृहज्जातके बाराहेनऽपि कथितम् यथा–

"चक्रस्य पूर्वापरभागेषु क्रूरेषु सौम्येषु च कीटलग्ने।
क्षिप्रं विनाशं समुपैति जनाः पापैर्विलग्नास्तमयान्वितैश्च।।" [10]

वादरायणेनाऽपि कथितम्–

"पूर्वापरभागगते शुभाशुभैरलिनि कर्कटे लग्ने।
जातस्य शिशोर्भरणं सद्यः कथयन्ति यवनेन्द्राः।।"[11]
अपि च कथयति दैवज्ञ जीवनाथमहानुभावः यथा–
'अशुभवगोदय गतौ शुभदैरबलोकितो न खलु युक्तविधुः।
मृतिरन्त्यगे कृशविधौ कुगजागमगैः खलैरपि विकेन्द्रशुभैः।।.[12]

स्थिरराशिलग्ने स्थिरराशियुक्तं पापग्रहद्वयं स्थितं भवेत् तथा चन्द्रोपरि शुभग्रहणां दृष्टिः न भवेत् पापग्रहोऽपि संयुक्ताः न स्यादिति जातकस्य मृत्युर्भवति। यदि क्षीणचन्द्रः द्वादशभावस्थः भवेत् लग्नाष्टमयोर्भावयोः स्थिरराशियुक्तं पापग्रहं भवेत यदि केन्द्रे शुभग्रहः न भवेत्तदा जातकः शीघ्रमेव मृत्युमुपैति। संदर्भितविषये कथितं वराहेनैतादृशम्–

"पापावुदायास्तगतौ क्रूरेण युक्तश्च शशि।
दृष्टश्च शुभैर्न यदा मृत्युश्च भवेदचिरात्।।
क्षीणेहेमगौ व्यवगे पापैरूदयाष्टमगैः।
केन्द्रेशु शुभाश्च न चेत्क्षिप्रं निधनं प्रवदेत्।।" [13]

एकः पापः लग्ने स्थितोऽन्योऽसाते अर्थात् सप्तमे गतः शशीयत्र तत्रस्थः पापेन युतो भवति। स च शुभग्रहैर्यदि न दृष्टस्तदा जातकस्य शीघ्रमेव मृत्युमुपैति। चन्द्रे लग्नात् द्वादशस्थे तथा पापैः उदयष्टमगैः अर्थात् लग्नास्थैरष्टमगतैश्च, केन्द्रेषु यदि शुभा न भवन्ति तदा जातस्य अवश्यमेव निधनं ब्रूयादिति।
अत्र केचित्पापैरूदयाष्टमगैरिति नेच्छेन्ति। तद्युक्तम् यस्मात भगवानगर्गिः–

क्षीणेचन्द्रे व्ययगते पापैरष्टमलग्नगैः।
केन्द्रे वाह्यगतैः सौम्यैर्जातस्य निधनं वदेत्।। [14]

विषयेऽस्मिन् वाराहमिहिराचार्यस्य वचनं यथा–

शशिन्यरिविनाशगे निधनमाशु पापेक्षिते शुभैरथ समाष्टकं दलमतश्च मिश्रैः स्थितिः।
उसम्भ्दिरवलोकिते बालभिरत्र मासे शुभे कलत्रसहिते च पापविजिते विलग्नाधिपे।। [15]

श्लोकस्यास्य भट्टोत्पलीयविवेचनमेतादृशं–चन्द्रे अरिविनाशगे अर्थात् लग्नात्षष्टस्थानस्थे वा तत्र च पापानां क्रुरग्रहाणामन्यतमे दृष्टे सौमग्रहेणादृष्टे जातस्य निधनं क्षिप्रमेव भवति। अत्र लग्नात्ष्ठाष्टमगे चन्द्रे सौम्यैर्ग्रहैदृष्टे पापेनादृश्यमाने जातस्य वर्षाष्टंक स्थितिः जीवितं कथनीयमीति ततोऽनन्तरं मरणमेति भावः। समाशब्दो वर्षप्रयासः लग्नात् षष्ठाष्टमगे चन्द्रे मिश्रः पापैः सौम्यैश्च दृष्टे अतोऽस्मात्सभाष्टकाद्वर्षाष्टका– दद्लमर्द्धं वर्षचतुष्टयं स्थितिर्भर्भत्तो मारणमेति।

अथर्रादेव षष्ठाष्टमस्थे चन्द्रमसि न केनाचिद्दृश्यमानेऽरिष्टयोगाभावः। चन्द्रमा यदि षष्ठाष्टमसिः सौम्यक्षेत्रेगतः सौम्यायुक्तो भवति तदा मरणप्रद।

मानवानां शिशुना चराचर प्राणीनाञ्च जन्मजनमान्तरीय सम्बन्धस्य मध्यस्थः माध्यमज्योतिशास्त्रीय ग्रहनक्षत्रकुप्रभावस्य शान्तिरेवति। बाह्माण्डस्य सृष्टेश्च ग्रहनक्षत्राणां विश्वस्य चराचराणामुपति प्रत्यक्षं प्रभाव स्यात्। एतादृशीमान्यता परम्पराया सृष्ट्यारम्भादेव मानवसमुदाये प्रचलिताऽस्ति। आधुनिकवैज्ञानिका अपि निर्विवादरूपेण स्वकुर्वन्ति यत् एतादृशग्रहनक्षत्राणां प्रभावं भवत्येव प्रत्येकेषु कुण कणेषु कण–कणेषु ग्रहनक्षत्राणां प्रभावम् अवश्यंभावी विद्यते कथितमाधुनिकवैज्ञानिकैः। अतएवं ग्रहनक्षत्राणां कुप्रभावपरिहारार्थं ग्रहप्रसन्नतार्थञ्च शान्तिरावश्यकी सिद्धा भवति। ग्रहनक्षत्रं जीवधारी न हि अपितु भौतिकपिण्डोऽसिता ग्रहैर्यत्प्रभावमस्माकमुपरि भवति।

निष्कर्षः–तत्त्वास्माकं पूर्वजन्मार्जितं स्वकीयं कर्मफलमेवेति। ग्रहाणाप्रसन्नार्थ वा ग्रहसंसूचितारिष्टमहायर्थ यत्प्रयोगमस्माकं महर्षिभिः कृतं तत्प्रयोगैः एव अध्यात्मिक तरंगैरस्माकं सम्बन्धः ब्रह्माण्डस्य ग्रहनक्षत्रैः सह स्थापयति। विशेषेषु संकटेषु आसन्नापति समये वा सामूहिकरूपेण सर्वेषां ग्रहाणां शान्त्यर्थं वा ग्रहविशेषशान्तिः वैदिकपरम्परया सर्वतः प्राचीनप्रभावशालीत्वं विधानं विद्यते। अतो ग्रहयज्ञशान्तिः जपध्यानयोगमाध्यमेन च ग्रहैस्सह आध्यात्मिकसम्बन्धं योज्यग्रहं कुप्रभावस्य सहायकं सिद्धं भवति। ग्रहनक्षत्रं कुप्रभावस्यापहारार्थं दानमपि आवश्यकं विद्यते। शास्त्रेषु पठितं दानं विधानं सर्वं सफलंसिद्धं भवति। रत्नधारणं, यन्त्रधारणं (यन्त्र चिन्तामणौ सर्वयन्त्रं पठितं विद्यते) इत्रेण औषधिना सरलदानेन, त्रिधातु वा त्रिशक्तिमुद्रिकाया औषधिमूलेन व्रतपूजनं स्तोत्रपाठेन, ग्रहोपासनव्रतेन चैतेषां ग्रहनक्षत्राणां कुप्रभावानां शान्तिर्भवेत इति बालारिष्टरोगविचारः विद्यते। सर्वे जनानाम् उपयोगीता च पगे–पगे बालसंरक्षार्थं भवेदिति।

**सन्दर्भाः**


1. जातकपारिजात अरिष्ट्धायायः 4 श्लोक 1।
2. जातकपारिजात अरिष्ट्धायायः 4 श्लोक 2।
3. सर्वार्थचिन्तामणि सं0 जा0 पा0 अ0 4 श्लोक 4।
4. बृहत्परासर होरा शास्त्र।
5. जातकपारिजात अरिष्टाधायायः 4 श्लोक 3।
6. सर्वार्थचिन्तामणि संकलित जातक पारिजात अरिष्टाधायायः 4 श्लोक 3।
7. जातकपारिजात अरिष्टाधायायः 4 श्लोक 2।
8. सारवली अध्याय 10 श्लोक 38।
9. लघुजातक अ श्लोक 2।
10. भावकौतुहल अ श्लोक 1।
11. वृहजा अ श्लोक 2।
12. संकलित भावकौतुहल अ श्लोक।
13. भावकौतुहल अ श्लोक 4
14. वृहजा अ 6 श्लोक 3–4।
15. भावकौतुहल अ श्लोक–6।